# શ્રીપદ્માવતીકવચમ્ ૨

## Shri Padmavatikavacham 2

sanskritdocuments.org

March 31, 2019

# Shri Padmavatikavacham 2

# શ્રીપદ્માવતીકવચમ્ ૨

## Sanskrit Document Information

Text title : padmAvatIkavacham 2

File name : padmAvatIkavacham2.itx

Category : devii, devI, jaina, kavacha

Location : doc_devii

Proofread by : DPD

Latest update : March 30, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 31, 2019

*sanskritdocuments.org*

# શ્રીપદ્માવતીકવચમ્ ૨

ભગવન્ ! સર્વમાખ્યાતં મન્ત્રં યન્ત્રં શુભપ્રદમ્ ।
પદ્માયાઃ કવચં બ્રૂહિ યદ્યહં તવ વલ્લભઃ ॥ ૧॥

મહાગોપ્યં મહાગુહ્યં પદ્માયાઃ સર્વકામદમ્ ।
કવચં મોહનં દેવિ ! ગુરુભક્તાય દીયતે ॥ ૨॥

રાજ્યે દેયં ચ સર્વસ્વં કવચં ન પ્રકાશયેત્ ।
ગુરુભક્તાય દાતવ્યમન્યથા સિદ્ધિદં ન હિ ॥ ૩॥

ઐં બીજમ્ । ક્લીँ શક્તિઃ । હ્સૌँ કીલકમ્ ।

પદ્માવતીપ્રીત્યર્થં જપે વિનિયોગઃ ।

ૐ પરબ્રહ્મણે નમઃ શિરસિ । અનુષ્ટુપ્છન્દો યો નમઃ મુખે ।
શ્રીપદ્માવતીશક્તિદેવતાયૈ નમઃ હૃદયે । આં બીજાય નમ કણ્ઠે ।
હ્રીં શક્તયે નમઃ ગુહ્યે । ક્રૌँ કીલકાય નમઃ પાદયોઃ ।

શ્રીપદ્માવતીકવચસિદ્ધ્યર્થં જપે વિનિયોગઃ ॥

ૐ પદ્મા બીજં શિરઃ પાતુ લલાટં પઞ્ચમી પરા ।
નેત્રે કામપ્રદા પાતુ મુખં ભુવનસુન્દરી ॥ ૪॥

નાશિકાં નાગનાથશ્ચ જિહ્વાં વાગીશ્વરી તથા ।
શ્રુતિરૂપા જગદ્ધાત્રી કરૌ હૃથિમવાસિની ॥ ૫॥

ઉદરં મોહદમની કુણ્ડલી નાભિમણ્ડલમ્ ।
પાર્શ્વ પૃષ્ઠ કટિં ગુહ્યં શક્તિસ્થાનનિવાસિની ॥ ૬॥

ઊરૂ જઙ્ઘે તથા પાદૌ સર્વવિઘ્નવિનાશિની ।
રક્ષ રક્ષ મહામાયે પદ્મે ! પદ્માલયે શિવે ॥ ૭॥

વાઞ્છિતં પૂરયત્યાશુ પદ્મા સા પાત સર્વતઃ ।
ભવદ તુ કવચં હ્રેગૃયા યો જાનાતિ સ મન્ત્રવિત ॥ ૮॥

રાજદ્વારે શ્મશાને ચ ભૂતપ્રેતોપચારકે ।
બન્ધને ચ મહાદુઃખે ભયે શત્રુસમાગમે ॥ ૯॥

સ્મરણાત્કવચસ્યામ્ય ભયં કિઞ્ચિન્ન જાયને ।
પ્રયોગમુપચાર ચ પદ્માયાઃ કર્તુમિચ્છતિ ॥ ૧૦॥

કવચં પ્રપઠેદાદૌ તતઃ સિદ્ધિમવાનુપ્નુયાત્ ।
ભૂર્યપત્રે લિખિત્વા તુ કવચં યસ્તુ ધારયેત્ ॥ ૧૧॥

દેહે ચ યત્ર કુત્રાપિ સર્વસિદ્ધિર્ભવેદ ધ્રુવમ્ ।
શસ્ત્રાગ્નિજં ભયં નેવ ભૂતાદિભયનાશનમ્ ॥ ૧૨॥

ગુરુભક્તિં સમાસાદ્ય પદ્માયાઃ સ્તવનં કુરુ ।
સહસ્રનામપઠને કવચં પ્રથમં કુરુ ॥ ૧૩॥

નન્દિના કથિતં દેવિ ! તવાગ્રે તત્પ્રકાશિતમ્ ।
સાઙ્ગતા જાયતે દેવિ ! નાન્યથા ગિરિનન્દિની ॥ ૧૪॥

ઇદ કવચમજ્ઞાત્વા પદ્માયાઃ સ્તૌતિ યો નર ।
કલ્પકોટીશતેનાપિ ન ભવેત્સિદ્ધિદાયિની ॥ ૧૫॥

ઇતિ શ્રીપદ્માવતીકવચં સમ્પૂર્ણમ્ ।

Proofread by DPD

*Shri Padmavatikavacham 2*

pdf was typeset on March 31, 2019

Please send corrections to *sanskrit@cheerful.com*